# मानवस्वास्थ्याय ज्यौतिश्शास्त्रम्

डा. के. नारायणः*

**सारांशः -**

दुःखस्य हेतुः कः? तत्परिहारोऽस्ति वा? अस्ति चेत् कः? मनुष्याणां रोगविषये शारीरिकं सामर्थ्य एकमेव आधुनिकशास्त्रद्वारा ज्ञातुं शक्यते। सामर्थ्याभावे च औषधप्रयोग एक एव दृष्टपरिहारः। तत्रापि औषधप्रयोगः सफलो भवेद्वा न वेति जिज्ञासा वैद्यकैः शमयितुं न शक्यते। बहुद्रव्यसाध्या चिकित्साऽपि वन्ध्या भवितुमर्हति। एवञ्च रोगसम्बन्धिनः सुखस्य दृष्टादृष्टोभयात्मकं प्रतिबन्धकत्रयं अङ्गीकरणीयम्। तत्र दृष्टप्रतिबन्धः औषधशात्रेण, अदृष्टप्रतिबन्धः ज्यौतिषादि शास्त्रेण, उभयात्मकप्रतिबन्धः उभाभ्यां च अतिलङ्घनीयः। अतिलङ्घनमसाध्यं चेत् तदपि ज्ञातव्यं प्रागेव, आयासो व्यर्थो मा भूदिति। सुखं प्रति आशा वा परिहर्तव्या। आशां प्रति विमुखीभावस्तु वेदान्तिभिरपि न सुशक्यः। किञ्च असौ निवृत्तिमार्गः न लौकिकानाम्। प्रवृत्तिमार्गिणां "जिजीविषेत् शतं समाः" इत्युपदेश एव सुग्रहः। तथा किञ्चिदत्र विचार्यते।

**कुञ्जीशब्दाः -** मानवस्वास्थ्यम्, ज्यौतिषम्, पुरुषार्थाः, मोक्षः, मुहूर्तम्, वेदाङ्गम्।

मानवस्वास्थ्याय ज्यौतिषस्य योगदानं कीदृशं भवेदिति चिन्तने ज्यौतिषस्य प्राधान्यं किमिति अस्मभिरवगन्त्यव्यम्।

**'वेदचक्षुः किलेदं स्मृतं ज्योतिषं मुख्यता चाङ्गमध्ये ........**
**........चक्षुषाषाङ्गेन हीनो न किञ्चत्करः॥ 1**

पुरुषार्थेषु मोक्षप्राप्तये धर्मार्थकामानां विनियोगः कदा कथं भवेदिति निश्चेतुं मुहूर्तकालादीनां ज्ञानमवश्यमपेक्षितमिति शास्त्रमिदं तदर्थं प्रवर्तते। ज्ञानमिदन्तु शस्त्रादस्मादेव प्राप्यते। अतः वेदाङ्गभूतस्य ज्योतिषस्य अनन्याङगापेक्षतया अस्त्येव प्राधान्यं चक्षु : कल्पनया। एवञ्च अन्धस्य यथा स्थितिरस्मिन् जगति तथा ज्योतिषज्ञानरहितस्य ज्ञानिनः परिकल्पनीयः। 'चक्षुषाङ्गेन हीनो न किञ्चित्करः' इति वचनं तमर्थमेव सूचयति। "साक्षात्कृतधर्माण ऋषयो बभूवुः। ते अवरेभ्यः

साक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तः अवरेभ्यः विल्म ग्रहणायेमं ग्रन्थं समाम्नासिषु वेदञ्च वेदाङ्गानि च।" (निरुक्तम्) इत्यनेन वेदानां वेदाङ्गानाञ्च प्राधान्यं स्फुटं प्रतिभाति। मन्युष्यः स्वभावत एवास्ति अन्वेषणप्राणी। विधातुः सृष्टिप्रक्रियायां यानि यानि वस्तूनि सन्ति तैस्सार्धं तादात्म्यसम्बन्धं स्थापयितुं प्रयतते। प्रयत्नेनानेन अस्य शास्त्रस्य मनुष्यस्य च परस्पर साबन्धः दृढीकृतः। स्वजीवने ज्योतिषशास्त्रतत्वानां प्रत्यक्षदर्शनं कर्तुमुत्साही जात इत्यर्थ :। अतः शास्त्रीयतत्वानां स्वानुभवानाञ्च सामञ्जस्यं तेन साक्षात्कृतम्।

आधुनिकशास्त्रवत् ज्यौतिषस्य शास्त्रत्वं भवति न वेति विचारः सर्वत्र प्रवर्तते। अत्र फलितज्योतिषे सामान्यतया विश्वासस्य अथवा सङ्कल्पस्य प्रभावेण शुभाशुभफलनिरूपणं तदनु वृत्तयः निश्चीयन्ते। तत्र कुत्रचित् युक्तिसहितप्रमाणानाम् अभावः अपि स्यात्। तथापि सिद्धान्त ज्योतिषस्य विषयाः प्रकटाः प्रमाणिकाश्च सन्ति। तेन शास्त्रत्वं अस्य भवतीति स्थाप्यते। ज्योतिषेण मानवजीवने विद्यमानाः आमयानमयाः निरूपायितुं शक्यते वा इत्यत्र चर्चा। स्वास्थविषये अस्य शास्त्रस्य साङ्गत्यं किमिति च अत्रत्याः विषयः। सर्वसामग्रीसद्भावेऽपि, अनुकूलसाहचर्योपलब्धावपि इष्टप्राप्तिर्न सम्भवति कदाचित् - इति तु अनुभवसाक्षिकं सत्यं केनाप्यपलपितुं न शक्यते। यथा चिकित्सामण्डले, इदमित्थन्तया रोगे निर्णीते, औषधेऽपि तद्रोगनाशकत्वेन दृष्टशक्तिके दत्ते, प्राशितेऽपि कचित् रोगानपगमः अतिरिक्तं कारणमाक्षिपति एवं अदृष्टं किमपि कारणमवश्यमीदृशैरनुभवैर्विभाव्यते। सुखमात्राभिलाषिणां दुःखलवलेशमप्यसहिष्णूनां मनुष्याणामतः दृष्टमार्गमात्रानुधावनं नैव समाश्वासदायि लोके दृश्यते।

दुःखस्य हेतुः कः? तत्परिहारोऽस्ति वा? अस्ति चेत् कः? मनुष्याणां रोगविषये शारीरिकं सामर्थ्य एकमेव आधुनिकशास्त्रद्वारा ज्ञातुं शक्यते। सामर्थ्याभावे च औषधप्रयोग एक एव दृष्टपरिहारः। तत्रापि औषधप्रयोगः सफलो भवेद्वा न वेति जिज्ञासा वैद्यकैः शमयितुं न शक्यते। बहुद्रव्यसाध्या चिकित्साऽपि वन्ध्या भवितुमर्हति। एवञ्च रोगसम्बन्धिनः सुखस्य दृष्टादृष्टोभयात्मकं प्रतिबन्धकत्रयं अङ्गीकरणीयम्। तत्र दृष्टप्रतिबन्धः औषधशात्रेण, अदृष्टप्रतिबन्धः ज्यौतिषादि शास्त्रेण, उभयात्मकप्रतिबन्धः उभाभ्यां च अतिलङ्घनीयः। अतिलङ्घनमसाध्यं चेत् तदपि ज्ञातव्यं प्रागेव, आयासो व्यर्थो मा भूदिति। सुखं प्रति आशा वा परिहर्तव्या। आशां प्रति विमुखीभावस्तु वेदान्तिभिरपि न सुशक्यः। किञ्च असौ निवृत्तिमार्गः न लौकिकानाम्। प्रवृत्तिमार्गिणां "जिजीविषेत् शतं समाः" इत्युपदेश एव सुग्रहः।

तत्र दृष्टादृष्टरूपे प्रतिबन्धतरणोपाये दृष्टोपायभूतस्य चिकित्सादेः, विश्वसनीयता अनुभवात्, उपपत्तिभिश्च भवति। अदृष्टोपाय एव सर्वत्र सर्वदा सन्दिह्यते, ग्राह्यो न वेति। यथा औषधशास्त्रं सोपपत्तिकमपि दृष्टापचारं दृश्यते एवं ज्योतिषाद्यदृष्टशास्त्राणामपि दृष्टापरचारता सुसहैवेतिब्रूमः। दृष्टापचारत्वं त्याज्यत्वे हेतुश्चेत् औषधशास्त्रमपि त्याज्यकोटिं प्रविशेत्। किन्तु न तथा।

जीवशरीरसङ्घातात्मकस्य मनुष्यादेः अपचयः अन्तरङ्गः बहिरङ्गः इत्युभयधा भवति। तत्र यावतां सन्निवेशः शरीरं नाम तावत्सु सम्भवी अपचयो बहिरङ्गः औषधशास्त्रोपदिष्टमार्गाश्रयणेन परिहरणीयः मनोबुद्ध्यादिसमवायभूतो जीवस्तु यमपचयमावहति सोऽन्तरङ्गः आध्यात्मिकमार्गावलम्बनेन परिहरणीयः।

दर्शनशास्त्रं समस्तभारतीयज्ञानस्य पृष्ठभूमिरस्ति । अतः सर्वविधज्ञानस्य मापनं एतद्वारा क्रियते। ज्यौतिषशास्त्रस्यापि मापनं दर्शनशास्त्रदृष्ट्या कृतमस्ति। दर्शनशास्त्रानुसारम् आत्मा एकैव नित्यः अन्यत्सर्वं नश्वरम्। तत्र प्राणिषु मानवजन्म श्रेष्ठं दुर्लभञ्चेति कथ्यते। पूर्वजन्मार्जितपुण्यकर्मणा मनुष्यशरिरस्य प्राप्तिः । तथापि बहूनां जन्मजन्मान्तरसञ्चितकर्मणां फलभुक्ति : एकास्मिन् जन्मनि एव न सञ्जायते। अतः वारं वारं जन्म फलभोगार्थं जन्म स्वीकर्तव्यं भवति। अनन्तरन्तु परमः मोक्षः। तत्र पूर्वजन्मकृतकर्म कीदृशमिति अस्मिन् जन्मनि न ज्ञायते । तथा च अस्मिन् जन्मनि किं करणीयमिह इति च। कदाचिदत्र किं करणीयं किमकरणीयमिति सन्देह : जायते। तस्मिन्नवसरे एतेषाम् उक्तविषयानां सर्वेषामपि ज्ञानसाधनसाहयकं भवाति षडङ्गीभूतं ज्यौतिश्शास्त्रम्।

**"स्कन्धत्रयात्मकं ज्योतिश्शस्त्रमेतत् षडङ्गवत्।**
**गणितं संहिता होरा चेति स्कन्धत्रयं मतम्॥**

प्रमाणं फलितमिति द्विधा विद्यमानं ज्यौतिषं , गणितं संहिता होरा इति त्रिधा विभक्तम्। एवं जातकं , गोलः , निमित्तं , . प्रश्नः , मुहूर्तः , गणितमिति षडङ्गानि च वर्तन्ते। सर्वे अनुभवा अस्मिन् जन्मनि एव मर्त्यस्य अत्र लोके अनुभववेद्याः भवन्ति ।जले पतितं शरीरं शुचिः र्भविष्यति, गोमये पतितं मलिनं भविष्यति, तैले पुनः पतितं स्निग्धं भविष्यति। एवं गानश्रवणं कुर्वत् मनः प्रसीदति, रोदनं श्रृण्वत् पुनः खिद्यते,, स्तोत्रं पठत् प्रशाम्यति। तत्तत्क्रियया मनसि तत्तद्विक्रिया सञ्जायते। सत्क्रियया सद्विकारः दुष्क्रियया दुर्विकारः । सर्वस्याः अपि क्रियायाः कर्तृत्वं मनस एव, न कायस्य। एतदेव "मनःकृतं कृतं कर्म न शरीरकृतं कृतं" इत्युच्यते। तत्तत्क्रियाकृत तत्तद्विकारविशिष्टं हि मनः। क्रियायाः फलं किमपि भवेदेव यत् कर्मफलमित्युच्यते। एवञ्च सत्कर्माणि दुष्कर्माणि च सुखदुःखप्रयोजकानि सम्पद्यन्ते । मनसि संलग्नाः दुर्विकाराः अपनेतुं शक्यन्ते विशिष्टक्रियाभिः । एतदेव प्रायश्चित्तादिकर्मणां सयुक्तिकता।

रुग्णां दुःखेऽपि स्वकृतदुष्कर्मभिर्वा अतिरिक्तं कारणं सम्भवेत्। एतत् ज्ञातुं ज्यौतिषातिरिक्तो नास्त्युपायः। शरीरस्थस्य रोगस्य विज्ञानं दृष्टोपपत्तिभिः यथा दृढं, एवं जीवगतो रोगः अदृष्टोपपत्तिभिः ज्ञातव्यो भवति। तस्मात् अदृष्टं ज्ञातुं ज्योतिषाख्यं शास्त्रमवतीर्णम्। मनोविज्ञानाधारेण सुप्रतिष्ठितं ज्योतिषशास्त्रम् । अत्र सूर्यचन्द्रकुजादयो ग्रहाः केवलं सामग्रयः । न तु सुखदुःखदायकाः, किन्तु ज्ञापकाः । "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहं" इति श्रीमद्भगवद्गीतावचनं सर्वस्य ज्योतिषशास्त्रस्य उपपत्तिं सङ्गृह्णाति। अस्य विवरणं जीवात्मा-परमात्मा, अथवा व्यष्ट्यात्मा

समष्ट्यात्मा, अथवा व्यष्टिमनः - समष्टिमनः - इत्येते शब्दाः समानार्थकाः । एतस्य द्वन्द्वस्य आत्यन्तिकया अभेद एव। जीवात्मपरमात्मनोरैक्यं हि वेदान्तादिशास्त्रेषु प्रतिष्ठापितम्। व्यष्टिमनः (Individual Mind) - समष्टिमनः- (Cosmic Mind) इत्येवं मनोवैज्ञानिकैः व्यपदेशः क्रियते। सुषुप्तावस्थायां स्वप्नेऽपि व्यष्टिमनः जागर्ति। एतदेव उपबोध (Subconsciousness) इत्युच्यते। व्यष्टिमनसः समष्टिमनसि लयो भवति सुषुप्तौ। सर्वज्ञत्वादिविशिष्टं समष्टिमनः सर्वकालव्यापि सर्वदेशव्यापि भवति। व्यष्टिमनसस्तु यदा समष्टिमनसा सह संलयो भवति तदैव सर्वज्ञत्वादि सिद्ध्यति। समष्टिमन एव सर्वं जगतः स्पन्दं नियन्त्रयति। समष्टिमनसा नियन्त्रितमेव सत् सर्वं जगत् स्पन्दते।

व्यष्टिमनसो जिज्ञासा समष्टिमनसा कथमपि उत्तरदानेन पूर्यते। यया भाषया प्रतिपाद्यते चेत् व्यष्टिमनस्तत्प्रतिपद्यते तया भाषया समष्टिमन उत्तरं ददाति। तत्तद्वासनावासितं व्यष्टिमनः न सर्वया भाषया प्रतिपादितं प्रतिपद्यते। "अष्टमस्थो बृहस्पतिः अशुभसूचकः" इत्येवं गृहीतवते बृहस्पतिसंज्ञिकां वराटिकां अष्टमे पातयित्वैव अशुभं ज्ञापयेत् समष्टिमनः। इयं युक्तिः ज्योतिःशास्त्रे सम्पूर्णे आश्रियते। यथा बाला अपि नाणकं प्रक्षिप्य तदवाङ्मुखत्वे उद्दिष्टकार्यसिद्ध्यभावं, तदुपरिमुखत्वेन पाते उद्दिष्टकार्यप्राप्तिरित्येवं निर्णयन्ति। यदा दृष्टैरुपायैः कश्चिदर्थो निर्णेतुं न शक्यते तदा वयमदृष्टमवलम्बामहे। जीवात्मनः जिज्ञासा वास्तविकी चेत् परमात्मा तत्तज्जीवात्मना अवगन्तुं शक्यया भाषया तां जिज्ञासां शमयिष्यत्येव।

सर्वेऽप्येते अदृष्टविज्ञानोपायाः उपर्युक्तयुक्त्यधिष्ठिता एवेति द्रष्टुं शक्यते । "ये यथा मां प्रपद्यन्ते. इत्यस्याप्ययमेवाशयः । ये जनाः यादृशवासनावासितान्तःकरणाः सन्तः समष्ट्यात्मानं वास्तविकजिज्ञासया उपसर्पन्ति तान् जनान् तैरधिगतया रीत्या बोधयति समष्ट्यात्मा इति तदाशयः प्रकृते ग्राह्यः । ईदृशी ग्रहस्थितिः यदा भवति तदा जनिं प्राप्नुवत् जीवः ईदृशजीवितं नयेत् इत्येवं गृहीतवान् जीवः पूर्वकर्मफलानुभोगाय पर्याप्तं भोगायतनं प्रविश्य तादृशग्रहस्थितिविशेषावसरे जनिं प्राप्य सुखदुःखमिश्रितं जीवितं लभते। अत एव तत्तद्देशे जातानां जातकं परिशोध्य तत्तद्देशप्रसिद्धफलप्रवचनशैल्या एव फलं निर्दिशेदिति वदन्ति । एकयैव पद्धत्या आश्रितया कथं सहस्रशो मनुष्येण जिज्ञासान् विषयान् निर्णेतुं शक्यते इति चेत् सत्यम्। तथा सुविशालं हि ज्योतिषशास्त्रं समृद्धिं भारतदेशे प्राप्नोत्। तत्र रोगपरिहारविषये बहवो मार्गाः प्रदिष्टाः। तेऽत्र विपुलया रीत्या प्रतिपादिताः। जातकदृष्ट्या तत्कालप्रश्नारूढदृष्ट्या च आमयादि विषयकज्ञानं यथा समष्ट्यात्मना दीयमानमवगन्तुं शक्नुमः तथा सुविपुला ज्योतिषशास्त्ररूपा अत्रत्यैः ऋषिभिः परिकल्पिता भाषा। अदृष्टे जीवे लिप्तं दुष्कर्मपत्रं ज्ञातुं अदृष्टाधारितं ज्योतिषमेकमेवास्ति साधनम्। दृष्टे काये विद्यमानं वैकल्यं तु औषधशास्त्रसामग्रीभिः सुज्ञानम्। अतः दृष्टादृष्टोभयात्मकस्य

अनामयादिनिमित्तकसुखप्रतिबन्धकस्य ज्ञानं, अपनयनं च इच्छतां नराणां दृष्टपथमिव अदृष्टपथमपि नूनं आवश्यकम्।

तत्रास्मिन् ज्योतिषे जन्मकालीनग्रहस्थितिविशेषाः, प्रश्नकालिंकग्रह- निमित्तादिस्थितयः, इत्यादयः भूतभविष्यदर्थज्ञापकत्वेनोपात्ताः। "अस्य शरीरिणः भूतकालिकं अशुभं ईदृशेदृशग्रहस्थितिनिमित्तस्थित्यादिरूपं मदवगतसङ्केतद्वारा परमात्मा मह्यं प्रदर्शयतु" इत्येवं तीक्ष्णया जिज्ञासया प्रार्थयमानाय जीवात्मने तदज्ञातवस्तुस्थितिः यादृशसङ्केतप्रदानेन तज्ज्ञानविषयो भवेत्तादृशसङ्केतैः प्रदर्शयेत्। ते सङ्केता एव शकुनानि इत्यपरनाम्ना व्यवह्रियन्ते। अत्यन्तं जटिलतया सङ्कीर्णतया च समुद्रवत् विशालाकारमाप्तं हि ज्योतिषाख्यं भारतीयदैवज्ञाधिगतं सङ्केतजालम्। तत्र जगदीश्वरेण प्रदर्श्यमानान् सङ्केतान् यथावद् अधिगन्तुं व्याख्यातुं च शक्तिमान् स्यात् दैवज्ञः।

मनुष्याणां जन्मकालिकग्रहस्थितिविशेषाः तेषामैहिकं र्जीवितं सम्पूर्ण व्याख्यातुं अलम्। एवञ्च तदाधारेण तेषां सन्तोषानुभवः कथं विज्ञातव्य इत्यत्र ज्योतिषोक्ता पद्धतिरत्र विशकलिताऽस्ति। जननात् प्राक् अर्थात् पूर्वजन्मनि कृतानां सुकृतदुष्कृतानां परिणतफलत्वेन इहजन्मनि जीवेन अनुभवितव्यं सन्ततिसम्बन्धि सुखं वा दुःखं वा जन्मकालिकग्रहावस्थानभेदैः दैवज्ञः अधिगच्छति। एवं दैवज्ञेन कार्यकारणयोरवगतयोः प्रायश्चित्तादि उपदिश्यते येन दृष्कृतपङ्किलो जीवः सुकर्मसुरभिलः सम्पाद्यते। मानवानां स्वास्थ्याय ज्योतिश्शास्त्रानुसारं को उपाय इति चिन्तने ग्रहाणां राशिस्थितयः परिशीलयेत्। ग्राहाणां स्थितिगत्यादिज्ञानेन जन्मलग्नादि द्वादश राशयः द्वादश भावाश्च अवलोकनीयाः। एवञ्चात्र द्वादशभावानां ग्रहाधिपत्यमुच्यते यथा -

**द्युमणिरमरमन्त्री भूसुतः सोमसौम्यौ गुरूरिनतनयारौ भार्गवो भानुपुत्रः।**

**दिनकरदिविजेज्यौ जीवभावज्ञमन्दाः सुरगुरुरिनसूनुः कारकाः स्युः विलग्नात्॥**

तत्र आचार्याणां मतानां विज्ञानस्य च सामञ्जस्यं भवति। सूर्यादि ग्रहाणां नक्षत्राणाञ्च रश्मीनां प्रभावः बहुधा प्राणिनां , सस्य लतादीनां , वस्तूनाञ्चोपरि विद्यते इत्यत्र न संशयः। यथा सूर्यचन्द्रयोः उदयात् कमलकुमुदिन्योः विकासः जायते इति। प्राणिनां रक्त प्रवाह : अपि एषः प्रभावः अस्ति। सस्य लतादिषु स्वाहारनिर्माणार्थ सूर्यरश्मिः , प्रकाशसंश्लेषणं इति प्रक्रियया सहकरोति। सा प्रसिद्धा विदिता च वैज्ञानिकरीतिः। ग्रहाणाम् अनुकूलस्थित्या शुभं प्रतिकूलस्थित्या अशुभञ्च जायते इति सामान्यतया अवगन्तव्यम्। एवं स्वास्थ्यनिरूपणे च विचिन्त्य आमयान् दूरीकर्तुं तदनु प्रतिक्रिया : स्वीकर्तुञ्च प्रभवाः स्युः मानवाः।

**सन्दर्भाः** -

1. सिद्धान्तशिरोमणिः - 1.11
2. प्रश्नमार्गः - 1.15
3. भगवद्गीता - 4.11
4. जातकपारिजातः - 2.51

**सहायकग्रन्थाः** -

1. बृहज्जातकम्
2. जातक पारिजातः
3. दशाध्यायी
4. सिद्धान्तशिरोमणिः
5. प्रश्नमार्गः
6. श्रीमद्भगवद्गीता

*असोसियेट प्रोफसर, सनातनधर्म कॉलेज, आलप्पुषा, केरल - 688003